# shrI mInAxI sundareshvara stotram

# શ્રીમીનાક્ષી સુન્દરેશ્વરસ્તોત્રમ્

## Document Information

Text title : mInAxI sundareshvara stotram

File name : minsundereshvara.itx

Category : devii, mInAkShI, stotra, devI

Location : doc_devii

Author : Traditional

Transliterated by : Subramanian Ganesh sgesh at hotmail.com

Proofread by : Subramanian Ganesh sgesh at hotmail.com

Latest update : March 15, 2001

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

shrI mInAxI sundareshvara stotram

# શ્રીમીનાક્ષી સુન્દરેશ્વરસ્તોત્રમ્

સુવર્ણપદ્મિનીતટાન્તદિવ્યહર્મ્યવાસિને
સુપર્ણવાહનપ્રિયાય સૂર્યકોટિતેજસે ।
અપર્ણયા વિહારિણે ફણાધરેન્દ્રધારિણે
સદા નમશ્શિવાય તે સદાશિવાય શંભવે ॥ ૧ ॥

સુતુઙ્ગભઙ્ગજાન્હુજાસુધાંશુખણ્ડમૌલયે
પતઙ્ગપઙ્કજાસુહૃત્કૃપીટયોનિચક્ષુષે ।
ભુજઙ્ગરાજકુણ્ડલાય પુણ્યશાલિબન્ધવે
સદા નમશ્શિવાય તે સદાશિવાય શંભવે ॥ ૨ ॥

ચતુર્મુખાનનારવિન્દવેદગીતમૂર્તયે
ચતુર્ભુજાનુજાશરીરશોભમાનમૂર્તયે ।
ચતુર્વિધાર્થદાનશૌણ્ડતાણ્ડવસ્વરૂપિને
સદા નમશ્શિવાય તે સદાશિવાય શંભવે ॥ ૩ ॥

શરન્નિશાકરપ્રકાશમન્દહાસમઞ્જુલા-
ધરપ્રવાલભાસમાનવક્ત્રમણ્ડલશ્રિયે ।
કરસ્ફુરત્કપાલમુક્તવિષ્ણુરક્તપાયિને
સદા નમશ્શિવાય તે સદાશિવાય શંભવે ॥ ૪ ॥

સહસ્રપુણ્ડરીકપૂજનૈકશૂન્યદર્શના
સહસ્વનેત્રકલ્પિતાર્ચનાચ્યુતાય ભક્તિતઃ ।
સહસ્રભાનુમણ્ડલપ્રકાશચક્રદાયિને
સદા નમશ્શિવાય તે સદાશિવાય શંભવે ॥ ૫ ॥

રસારથાય રમ્યપત્રભૃદ્રથાઙ્ગપાણયે
રસાધરેન્દ્રચાપશિઞ્જિનીકૃતાનિલાશિને ।
સ્વસારથીકૃતાજનુન્નવેદરૂપવાજિને
સદા નમશ્શિવાય તે સદાશિવાય શંભવે ॥ ૬ ॥

અતિપ્રગલ્ભવીરભદ્રસિંહનાદગર્જિત
શ્રુતિપ્રભીતદક્ષયાગભોગિનાકસદ્મનામ્ ।
ગતિપ્રદાય ગર્જિતાખિલપ્રપઞ્ચસાક્ષિણે
સદા નમશ્શિવાય તે સદા શિવાય શંભવે ॥ ૭ ॥

મૃકણ્ડુસૂનુરક્ષણાવધૂતદણ્ડપાણયે
સુગણ્ડમણ્ડલસ્ફુરત્પ્રભાજિતામૃતાંશવે ।
અખણ્ડભોગસમ્પદર્થિલોકભાવિતાત્મને
સદા નમશ્શિવાય તે સદા શિવાય શંભવે ॥ ૮ ॥

મધુરિપુવિધિશક્રમુખ્યદેવૈરપિ નિયમાર્ચિતપાદપઙ્કજાય ।
કનકગિરિશરાસનાય તુભ્યં રજતસભાપતયે નમઃ શિવાય ॥ ૯ ॥

હાલાસ્યનાથાય મહેશ્વરાય હાલાહલાલઙ્કૃતકન્ધરાય ।
મીનેક્ષનાયાઃ પતયે શિવાય નમો નમઃ સુન્દરતાણ્ડવાય ॥ ૧૦ ॥

ત્વયા કૃતમિદં સ્તોત્રં યઃ પઠેદ્ભક્તિસંયુતઃ ।
તસ્યાઽઽયુર્દીર્ઘમારોગ્યં સમ્પદશ્ચ દદામ્યહમ્ ॥ ૧૧ ॥

---

Encoded by Subramanian Ganesh <स्गेश्@होत्मैल्ॅओम्> From hAlAsya mahAtmiyam.

---

*shrI mInAxI sundareshvara stotram*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*